स्वरूपोऽहं केवलोऽहं सदाशिवः। द्रष्टुः श्रोतुर्वक्तुः कर्त्तुर्भोक्तुर्विभिन्न एवाहम्। नित्यनिरन्तरनिष्क्रियो निःसीमाऽसङ्गपूर्णबोधात्मा। नाहमिदं नाहमदोऽप्युभयोरवभासकं परं शुद्धम्। बाह्याभ्यन्तरशून्यं पूर्णं ब्रह्माद्वितीयमेवाहम्। निरुपममनादितत्त्वं त्वमहमिदमदइति कल्पनादूरम्। नित्यानन्दैकरसं सत्यं ब्रह्माद्वितीयमेवाहम्। नारायणोऽहं नरकान्तकोऽहं पुरान्तकोऽहं पुरुषोऽहमीशः। अखण्डबोधोऽहमशेषसाक्षी निरीश्वरोऽहं निरहञ्च निर्म्ममः। सर्व्वेषु भूतेष्वहमेव संस्थितो ज्ञानात्मनान्तर्बहिराश्रयः सन्। भोक्ता च भोग्यं स्वयमेव सर्व्वं यद्यत् पृथक् दृष्टमिदन्तया पुरा। मय्यखण्डसुखाम्भोधौ बहुधा विश्ववीचयः। उत्पद्यन्ते विलीयन्ते मायामारुतविभ्रमात्। स्थूलादिभावा मयि कल्पिता भ्रमादारोपितानुस्फुरणेन लोकैः। काले यथा कल्पकवत्सरायनर्त्वादयो निष्कलनिर्व्विकल्पे। आरोपितं नाश्रयदूषकं भवेत् कदापि मूढैरतिदोषदूषितैः। नार्द्रीकरोत्यूषरभूमिभागं मरीचिकावारिमहाप्रवाहः। आकाशवत् कल्पविदूरगोऽहमादित्यवद्भास्यविलक्षणोऽहम्। आहार्य्यवन्नित्यविनिश्चलोऽहमम्भोधिवत् पारविवर्जितोऽहम्। न मे देहेन सम्बन्धो मेघेनेव विहायसः। अतः कुतो मे तद्धर्म्मा जाग्रत्स्वप्नसुषुप्तयः। उपाधिरायाति स एव गच्छति स एव कर्म्माणि करोति भुङ्क्ते। स एव जीर्य्यन् म्रियते सदाहं कुलाद्रिवन्निश्चल एव संस्थितः। न मे प्रवृत्तिर्न च मे निवृत्तिः सदैकरूपस्य निरंशकस्य। एकात्मको यो निविडो निरन्तरो व्योमेव पूर्णः स कथं नु चेष्टते?। पुण्यानि पापानि निरिन्द्रियस्य निश्चेतसो निर्व्विकृतेर्निराकृतेः। कुतो ममाखण्डसुखानुभूतेः? ब्रूते ह्यनन्वागतमित्यपि श्रुतिः। छायया स्पृष्टमुष्णं वा शीतं वा सुष्ठु दुष्ठु वा। न स्पृशत्येव यत् किञ्चित् पुरुषं तद्विलक्षणम्। न साक्षिणं साक्ष्यधर्म्माः संस्पृशन्ति विलक्षणम्। अविकारमुदासीनं गृहधर्म्माः प्रदीपवत्। रवेर्यथा कर्म्मणि साक्षिभावो वह्नेर्यथा दाहनियामकत्वम्। रज्जोर्यथारोपितवस्तुसङ्गस्तथैव कूटस्थचिदात्मनो मे। कर्त्तापि वा कारयितापि नाहं भोक्तापि वा भोजयितापि नाहम्। द्रष्टापि वा दर्शयितापि नाहं सोऽहं, स्वयंज्योतिरनीदृगात्मा। चलत्युपाधौ प्रतिबिम्बलौल्यमौपाधिकं मूढधियो नयन्ति। स्वबिम्बभूतं रविवद्विनिष्क्रियं कर्त्तास्मि भोक्तास्मि हतोऽस्मि हन्ता। जले वापि स्थले वापि लुठत्वेष जडात्मकः। नाहं विलिप्ये तद्धर्म्मैर्घटधर्म्मैर्नभो यथा। कर्त्तृत्वभोक्तृत्वखलत्वमत्तताजडत्वबद्धत्वविमुक्ततादयः। बुद्धेर्विकल्पा न तु सन्ति वस्तुतः स्वस्मिन् परे ब्रह्मणि केवलेऽद्वये। सन्तु विकाराः प्रकृतेर्दशधा शतधा सहस्रधा वापि। किं मे सङ्गिभरेभिर्न ह्यम्बुदा वरमम्बरं स्पृशन्ति। अव्यक्तादिस्थूलपर्य्यन्तमेतद्विश्वं यत्राभासमात्रं प्रतीतम्। व्योमप्रख्यं सूक्ष्ममाद्यन्तहीनं ब्रह्माद्वैतं यत्तदेवाहमस्मि। सर्व्वाधारं सर्व्ववस्तुप्रकाशं सर्व्वाकारं सर्व्वगं सर्व्वशून्यम्। नित्यं शुद्धं निश्चलं निर्विकल्पं ब्रह्माद्वैतं यत्तदेवाहमस्मि। यस्मिन्नस्ताशेषमायाविशेषं प्रत्यग्रूपं प्रत्ययागम्यमानम्। सत्यज्ञानानन्दमानन्दरूपं ब्रह्माद्वैतं यत्तदेवाहमस्मि। निष्क्रियोऽस्म्यविकारोऽस्मि निष्कलोऽस्मि निराकृतिः। निर्विकल्पोऽस्मि नित्योऽस्मि निरालम्बोऽस्मि निर्द्वयः। सर्वात्मकोऽहं सर्वोऽहं सर्वातीतोऽहमद्वयः। केवलाखण्डबोधोऽहमानन्दोऽहं निरन्तरम्। स्वाराज्यसाम्राज्यविभूतिरेषा भवत्कृपाश्रीमहिमप्रसादात्। प्राप्ता मया श्रीगुरवे महात्मने नमो नमस्तेऽस्तु पुनर्नमोऽस्तु"।

पुनस्तल्लक्षणं तत्रैवोक्तं यथा

"क्षुधां देहव्यथां त्यक्त्वा बालः क्रीडति वस्तुनि। तथैव विद्वान् रमते निर्म्ममो निरहं सुखी। चिन्ताशून्यमदैन्यभैक्ष्यमशनं, पानं सरिद्वारिषु, स्वातन्त्र्येण निरङ्कुशा स्थितिरसौ निद्रा श्मशाने वने। वस्त्रं क्षालनशोषणादिरहितं दिग्वास्तु शय्या मही सञ्चारो निगमान्तवीथिषु विदां क्रीडा परे ब्रह्मणि। विमानमालम्ब्य शरीरमेतद् भुनक्त्यशेषान् विषयानुपस्थितान्। परेच्छया बालवदात्मवेत्ता योऽव्यक्तलिङ्गोऽननुसक्तबाह्यः। दिगम्बरो वापि च साम्बरो वा त्वगम्बरो वापि चिदम्बरस्थः। उन्मत्तवद्वापि च बालवद्वा पिशाचवद्वापि चरत्यवन्याम्। कामान्निष्कामरूपी संश्चरत्येकचरो मुनिः। स्वात्मनैव सदा तुष्टः स्वयं सर्वात्मना स्थितः। क्वचिन्मूढो विद्वान् क्वचिदपि महाराजविभवः क्वचिद्भ्रान्तः सौम्यः क्वचिदजगराचारकलितः। क्वचित् पात्रीभूतः क्वचिदवमतः क्वाप्यविदितश्चरत्येवं प्राज्ञः सततपरमानन्दसुखितः। निर्धनोऽपि सदा तुष्टोऽप्यसहायो महाबलः। नित्यतृप्तोऽप्यभुञ्जानोऽप्यसमः समदर्शकः। अपि कुर्व्वन्नकुर्व्वाणश्चाभोक्ता फलभोग्यपि। शरीर्य्यप्य-